दिनाङ्क :- 28.06.2024
प्रात: - 06: 55

## राष्ट्रपति: अभिभाषणम्

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: ह्य: संसद: उभयो: सदनयो: संयुक्तोपवेशनं सम्बोधयन्ती प्रशासनस्य प्राथमिकता: प्रकाशितवती। राष्ट्रपति: प्रोक्तवती यत् ग्रामेषु कृषि-दुग्धोत्पादक-मत्स्याधारित-उद्योगानां विस्तार: क्रियते। स्वीय एकहोरात्मके अभिभाषणे राष्ट्रपतिना आधारभूतसंरचनानां विकासाय प्रशासनस्य पदक्षेपान् अपि उत्थापितवती प्रोक्तवती च यत् प्रधानमंत्री-ग्राम-सडक-योजनाया: अन्तर्गतं विगतेषु दशवर्षेशु अशीति-सहस्त्राधिक-त्रिलक्ष किलोमीटरमितं ग्रामीण-मार्गाणां निर्माणं जातम्। पूर्वोत्तर-राज्यस्य विकासम् अभिलक्ष्य राष्ट्रपति अकथयत् यत् प्रशासनम् स्वीय-एक्ट-ईस्ट इत्यस्या: नीते: अन्तर्गतं एतेभ्य: क्षेत्रेभ्य: रणनीतिक प्रवेशद्वारस्य निर्माणस्य कार्यमपि समाचरति। एतस्मिन् क्रमे असमराज्ये सप्तविंशति-सहस्र-कोटि रूप्यकाणां व्ययेन निर्मितस्य अर्द्धचालक-संयन्त्राणि स्थापयति।

निजोद्बोधने राष्ट्रपति अग्रे निगदितवती यत् जम्मूकश्मीरराज्येन भारतस्य शत्रुभ्य: लोकसभा-निर्वाचने कीर्तिमत्रूपेण मतदानानि कृत्वा प्रबलोत्तरं प्रदत्तम्। स्वोद्बोधनं अग्रे प्रख्यापयन्ती राष्ट्रपति: अभिव्यक्तवती यत् नवनिर्वाचित प्रशासनेन अस्मिन् सदने स्वकीय सामान्य-आय-व्यय अर्थ संकल्पनापत्रं प्रस्तूयते यद्धि भविष्यकालक-दृष्टियुतं नीतियुतं च भविष्यति। व्यतीतेषु दशवर्षेषु देशस्य अर्थव्यवस्था एकादशसोपानत: पञ्चमे सोपाने समायाता।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी आकाशवाण्या: "मन की बात" इति कार्यक्रमे अस्य मासस्य त्रिंशत् दिनाङ्के देशवासिभि: साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं एकादशाधिकैक-संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्या: दूरदर्शनस्य च सर्वाभि: वाहिनिभि: प्रसारयिष्यते। अयं कार्यक्रम: आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारणमन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिण: सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रम: क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। जना: निजविचारान् परामर्शान् च नि:शुल्क दूरभाषसंख्यायाम् 1800-11-7800 इत्यत्र प्रेषितुम् शक्नुवन्ति।

## सीबीआई-नीट

केन्द्रीय-अन्वेषणाभिकरणेन नीटयूजी-परीक्षा सम्बद्धे द्वौ जनौ निगृहीतौ। आधिकरिकसूचनानुसारि एतौ आरोपिणौ बिहारे पटनात: निगृहीतौ। नीटयूजी परीक्षा-प्रश्नपत्राणां दुरूद्घाटनस्य प्रकरणस्य निरीक्षणकर्ता सी.बी.आई. इत्यनेन सोमवासरे बिहाराररक्षिदलस्य आर्थिकापराध घटकस्य कार्यालय: गत:, तत्सम्बद्धे च निरीक्षणं समारब्धम्।

## क्रिकेट्

अन्ताराष्ट्रिय-क्रिकेट-परिषदः पुरूषाणां विंशतिप्रतिविंशति विश्व-चषक-क्रिकेट-प्रति-स्पर्धायां ह्यः रात्रौ गुयानानगरे स्पर्धायां उपान्त्यचक्रे भारतदलं इंग्लैण्ड-दलं अष्टषष्टिः धावनांकैः पराजित्य अन्तिमचक्रे द्वन्द्वाय प्राविशत्। शनिवासरे बारबाडोस नगरे भारतस्य प्रतिस्पर्धा अन्तिमचक्रे दक्षिणाफ्रीकादलेन साकं भविष्यति।